37. सापिण्डन श्राद्धपद्धतिः
पत्र - 14, स०

1341

10"X6"

अथ — ८

राम [illegible] इति [illegible] ॥ राम

संवत् १८७१

॥ श्रीगणेशाय नमः । तत्र क्रमः । देवे पित्रे प्रेते अपसव्यं आचमनम् ॥ नमोस्
त्वनंतायेति मंत्रेण पठित्वा इति पादप्रक्षालनम् ॥ अथ निमंत्रणम् ॥ पिताम
हादित्रय श्राद्ध संबंधिना कालकामानाम्ना विश्वेषां देवानां श्राद्धे कर्तव्ये
सपिण्डन श्राद्धे तत्र भवंतो मया निमंत्रितास्मः इति प्रतिवचनम् ॥ अक्रोध
नैरिति नियम श्राद्धे तत्र भवंतो मया निमंत्रितास्म ॥ अक्रोधनैरिति निजमा
नस्मादयेत ... थेदानम् सहस्रशीर्षेति पूजनम् पितामहादिब्राह्मणानां ओं अपसव्यम्
गतवः स्वागतम् पादप्रक्षालनम् यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपु-
ष्करे तत्फलं प्राप्नुयुः सर्वे विप्राणां पादशौचने विप्रपादोदकक्लिन्ना या
वत्तिष्ठति मेदिनी तावत्पुष्करपात्रेषु पिबंति पितरो जलम् ॥ निमंत्रण
म् अमुकगोत्राणां अस्मत्पितामह प्रपितामह वृद्धप्रपितामहानां अमु
कामुकामुक शर्मणां वसुरुद्रादित्यस्वरूपाणाम् अद्य कर्तव्ये सपिंडन श्रा ॥१॥

श्राद्धे तत्र भवंतो मया निमंत्रिताः निमंत्रिताः स्म इति प्रतिवचनम्॥ अक्रोध
नैरिति पठेत्॥ पादार्घदानम् यादिव्येति पूजनम् यद्दिव्या आपः पयसा
संबभूवुर्या अंतरिक्ष उत पार्थिवीर्या हिरण्यवर्णा यज्ञियास्तान आपः शि
वाः शं स्योनाः सुहवा भवन्तु अमुक गोत्राः अस्मत्पितामह प्रपितामह
वृद्धप्रपितामहाः अमुकामुकामुक शर्मराः वसुरुद्रादित्यस्वरूपाः एष
वः पादार्घोऽस्तु॥ सव्यम् आचमनं इदमाचमनीयं विश्वेभ्यो देवे
भ्यो नमः॥ अपसव्यम् इदमाचमनीयं पितामहादिभ्यः स्वधा॥ सव्यम् इ
दमासनमासनमास्यतामिति श्राद्धदेशोपवेशनम् देवे॥ अपसव्यम् पि
आस्येति प्रतिवचनम् प्रत्यासनमास्यामि पंचदेवे तैलेन दीपकान आ
दत्ते ज्वालयेत् दीपमंजेचैं साङ्च वन्धयेत्॥ सव्यम् आत्मासनम् समाचारा
वाम भागे। त्कसेपात्र स्थापनम् पवित्रे स्थोपवित्रधारणम् पवित्रे स्थो वैष्णव्यौ सवितुर्व

प्रति

॥२॥ पूर्वतुनाम्यहिर्दैर्गासूपस्यरस्मिभिः॥ कुशान् शन्नोदेवीरभीष्टयआपोभ
वन्तुपीतये शंयोरभिस्रवन्तुनः इतिजलम् ॥ ॐ यवोसि यवयास्माद्वेषो य
वयारातिर्दिवेत्वा अंतरिक्षायत्वा पृथिव्यैत्वा संधंतां लोकाः पितृषदनाः पि
तृषदनमसि॥ यवान् ॥ तिलोसिसोमदैवत्यो गोसवो देवनिर्मितः पयत्न
मद्भिः प्रकृतः स्वधयापितृन्लोकान्प्रीणाहीनः स्वाहा इतितिलम्॥ गंध
पुष्पवतस्थीन् ॥ पात्राणांतयाकुशपुष्पगंधादिक्षिपेत् असावेतत्तेय
वकुशतिलानाम् कर्मपात्रसमीपेस्थापनम् कर्मपात्रम्परिपूर्णम्परिपूरया
मस्तु॥ प्राणायामंकृत्वाऽग्रे गुह्यसरां कुर्वीत आपवित्रः पवित्रोवा सर्वावस्
थांगतोपिवा यस्मरेत्पुंडरीकाक्षं सबाह्याभ्यंतरः शुचिः पुन्डरीकाक्षस्मरणा
म् देवताभ्यः पितृभ्यश्च महायोगिभ्यएवचनमः स्वाहायैस्वधायैनित्य

मेवनमोनमः इतित्रिपठेत्॥ सप्तव्याधादशार्णेषु मृगाः कालंजले
गिरौ चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे तेऽपि याताः कुरुक्षेत्रे ब्रा
ह्मणाः वेदपारगाः प्रस्थिता दीर्घमध्वानं युयं किमवसीदथ पंचक्रो
शं गयाक्षेत्रं क्रोशमेकं गयाशिरः यत्रयत्र स्मरेद्धामि पितृणां दत्तम
क्षयं मन्त्रमक्षम्॥ अपसव्यम् श्राद्धं रंभेगयां ध्यात्वा ध्यात्वा दे त्वादेवं
दा गदाधरं मस्वपितृन्मनसा ध्यात्वा ततः श्राद्धं समारभेत गयायेनमः
गदाधरायनमः स्वपितृभ्योनमः अग्निष्वात्ताः पितृगणाः पूर्वरक्ष प्रा
न्तुमेदिशाम् तथावर्हिषदः पान्तु याम्यां ये पितरस्थिताः प्रतीचीमाज्य
पाः पान्तु उदीचीमपि सोमपाः पान्तु ऊर्ध्वं तस्त्वार्यमोरक्षे त्कव्यवाडनलोप्य
धः रक्षोभूतपिशाचेभ्य स्तथैवासुरदोषतः सर्वस्याधिपस्तेषां यमो
रक्षांकरोतु मो तिलारक्षन्तु सुरान्द्भीरं क्षन्तु राक्षसान् पंक्तिभ्योऽज्ञो

॥३॥

नीवीवं[illegible] अपसव्यं [illegible]
त यं[illegible] ह देया [illegible] यथा [illegible] गरस्त [illegible]

त्रियोरक्षे दीपिसर्वतोऽवनु असुराणां भुजरक्षेतारुदकस्पर्शनम् ॥ अथ नीवी
वंधनम् ॥ नवनेभ्यस्त्वमोषधीभ्यस्त्वन्नृणान्नृपतेमायमेशुन्धिः इति
नीवीवंधनम् ॥ अथ प्रेत ॥ सव्यमाचमनम् पवित्रधारणम् अपसव्यम् ॥ अभ्या
गतस्याहं प्रक्षालनम् ॥ निमंत्रणम् अमुकगोत्रस्यामुकप्रेतस्याद्यैकोद्दिष्टे
सपिन्डन श्राद्धे त्वं भवान्मया निमंत्रितः ॥ गतोसि दिव्यलोके त्वं कृ[illegible]
[illegible] कुशेल्वारु निवेशिते ॥ निमंत्रितोसि
त्त अक्रोधनैरिति श्राद्धम् ॥ पादार्घदानम् अमुकगोत्रामुकप्रेत प्रेतत्व
विमुक्तिपूर्वक अक्षयस्वर्गलोकगमनप्राप्तिकामनया एषपादार्घो मयादी
यते नवोपतिष्ठताम् ॥ सव्यमाचमनम् अपसव्यम् प्रेतब्राह्मण इदमास
नमास्यताम् ॥ सव्यमकर्मपात्रस्थापनम् यथा आसनेपात्रन्याचे पवित्रे

नीवीकार्यापस
व्येन ॥
सव्येनीवीनु
विप्राणामप
सव्ये वरोत्र
यं नीवीभेद
नजाना ति
रमाः पितरो
गताः ॥१॥

॥३॥

स्य इति पवित्र धारणम्॥ शन्नोदेवीरिति जलम् भूमौ ३ शीरादि प्रदेशे प्रः
कर्मपात्रे संपन्नमस्तु प्राणायामः कुंडरीका स्मरणम् अभ्युक्षणं कुर्या
त्॥ अपसव्यम् दिग्बंधः तिलाविकरणम् अग्निप्रज्वलनम् सव्यमाचमन
नम्॥ संकल्पः अद्ये हेत्यादि अमुक गोत्रस्यामुक प्रेत प्रेतत्व विमुक्ति पूर्व
कपितृत्व प्राप्त्यामुक गोत्राणाम् अस्मत् पितामह प्रपितामह वृद्ध प्रपिता
महानां अमुकामुकामुक शर्म्मणाम् वसुरुद्रादित्यस्वरूपाणाम् सपत्नीका
नाम् विश्वेदेव पूर्वक सपिंडन श्राद्ध मूहं करिष्ये कुरुष्व॥ ह्रदि निपाता
देरीपात्पाक द्दीन म्या विवृतास्तु इति पाक प्रोक्षणं॥ अपहता इति तिलान्विकी
सु३ र्य॥ गायत्रीं जपेत् ततः कुशान्मं पितामहादि त्रय श्राद्ध सम्बंधिनां काल
कामनाम्नां विश्वेषां देवानामिदं कुशासनमस्तु॥ अपसव्यम् अमुक गोत्राणा
मस्मत्पितामह प्रपितामह वृद्ध प्रपितामहानां अमुकामुकामुक शर्मणा

॥४॥ स्वसुरुद्रादित्यस्वरूपाणांसपितॄनश्राद्धे इदं कुशासनं तेषां विभक्तेभ्योनमः

॥ प्रेते अमुकगोत्रस्यामुकप्रेतस्य इदंकुशासनम्मयादीयतेतवोपतिष्ठ-

अपसव्ये तामसव्यम आवाहनंयवानादायपितामहादित्रयश्राद्धसंबंधिनःका

लकामनाम्नः विश्वान्देवानावाहयिष्ये ॐ आवाहय विश्वेदेवा आगता

श्रृणुता तामयिमं ॐ हवम एदम्बर्हिषीनीषीदत विश्वेदेवाः श्रृणुतेमयथ

हवम्मेयेअंतरिक्षे य उपद्यविष्ठायेअग्निजिह्वा उतवायजत्रा आसद्यास्मिन्ब ह्वौ६

षि॥ र्हिमादायध्वम् इतिमंत्रद्वयाभ्यांआवाह्य ॥ आगतात विश्वेदेवविषये आ-

गच्छंतुमहाभागा विश्वेदेवा महाबलाः येयत्रविहिताश्राद्धे सावधानाभ

वंतुते॥ अपसव्यम तिलानादाय अमुकगोत्रानास्मत्पितामह प्रपिता

मह वृद्धप्रपितामहान अमुकामुकामुकशर्मणः वसुरुद्रादित्यस्वरू-

पान पितॄन आवाहिष्ये ॐ आवाहय उसंतस्त्वनिधीमहि उसंतः समि

॥४॥

धीमहि उशन्तस्त्वा निधीमहि उशन्तः समिधीमहि उशन्नुशत आवाह पितॄन्हविषे अत्तवे १ आयन्तु नः पितरः सोम्यासो अग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान् इति मंत्रद्वयाभ्यामावाहनं ॥ सव्यम् पूर्वोक्तमंत्रैर्हस्ते पात्रपूरणम् ॥ देवपात्रे सम्पन्नं सुसंपन्नमस्तु देवपात्रमुत्थाप्य पवित्रे द्विजकरे दत्त्वा या दिव्या इति पठेत् ॥ पितामहादित्रयश्राद्धसंबन्धिनः कालकामनामानो विश्वेदेवाः सपिण्डनश्राद्धे एकहस्तार्घो वो नमः अर्घः पुनः पुनरर्घमस्तु उदकस्पर्शनम् ॥ अपसव्यम् पितामहादित्रयाणां संपन्नानि सुसम्पन्नानि सन्तु ॥ पात्रमुत्थाप्य पवित्रे द्विजकरे कृत्वा या दिव्या इति पठेत् ॥ अमुकगोत्राऽस्मत्पितामह अमुकशर्मन् वसुरूप सपिण्डनश्राद्धे एकहस्तार्घस्ते नमः अर्घः पुनः प्रत्यर्घमस्तु उदकस्पर्शनम् इति सर्वत्र ॥ अमुकगोत्राऽस्मत्पितामह अमुकशर्मन् रुद्ररूप एष हस्तार्घस्ते नमः अर्घः पुनः ८ ॥ अथ प्रेते अर्घपात्रपूरणम् ॥ यथा प्रेतद्विजाग्रे द

ह्निरणाकंलेस्वांजले नोद्दिष्य तत्रपात्रंनिधायतस्मिन्नेकपवित्रंमूर्त्तिर्धीय
शन्नोदेवीरितिजलम् ॥ तिलोसिसोमदैवत्योगोसवोपेत ॥ प्रेतपात्रेसम्पन्नमस्तु
सम्पन्नमस्तु ॥ यादिव्येति पवित्रंद्विजकरेदत्वा ॥ अमुकगोत्रप्रेत ०रूपास्
तार्घोमद्दत्तस्तावोपतिष्ठतामिति मन्त्रयपात्रजलमवशेष्यदद्यात् ॥ ततः
पितृमन्डलंनीत्वा अपसव्येन प्रेतस्तत्रस्यजलतृतीयांशम्पितामहार्घपा
त्रेषुप्रासिञ्चेत् ॥ अमुकगोत्रस्यअमुकप्रेतस्यप्रेतत्वविमुक्ति पूर्वकपितृ
लोकप्राप्तयेअमुकगोत्रेणअस्मत्पितामहेनअमुकशर्मणावसुरूपेणसह
सार्घ्यंकरवाणिकुरुष्वेत्यनुज्ञातः ॥ येसमानाइतिद्वयोः ॥ प्रजापत्यस्त्रि-
सस्वतीद्राब्रह्मणयः प्रथमायाःपितरोदेवताद्वितीयायाजयमानआरस्तत्
पुंद्रदः सार्घ्यःकरणेविनियोगः ॥ येसमानाःसमनसःपितरोयमराज्ये तेषां
षांल्लोकः स्वधानमोजज्ञेदेवेषुकल्पताम् येसमानाःसमनसोजीवाजी

वेषु मामकाः तेषाᳫं श्रीमपि कल्पतामस्मिंल्लोके शतᳫं समाः सह्रु
द्यं सम्वोमनास्सिजानताम् देवाभागं यथापूर्वे सञ्जानानाउपासते स
मानोमंत्रः समितिः समानी समानम्मनः सहचित्तमेषां समानमं मे ३
त्रमभिमंत्रयेवः समानेनवोहविषाजुहोमि समानानोवहृतिः॥ समा
नहृदयावः समानवस्तुवोमनोयथावः सुसहासति॥ मधुवाता का
ताइति कौकुचं धम्यठदितिवेचित्र॥ एभिमंत्रैः पितामहार्घपात्रेवृती
यांसन्निलयेत्॥ ततः पितामहार्घपात्रेसंस्रवान्संचयनं
विश्वदेविकपात्रेनीत्वा तदेकमध्यमपात्रपार्श्वे मूर्द्धन्यत्तो वामभागेपि
तृभ्यः स्थानमसीति उत्तानं कृत्वा निदधाति॥ तत्रस्वधावाचनीयान्नाम
मि॥ कुशत्रयन्निदधाति॥ अन्येपात्रे सञ्चरेन्निधाय॥ सव्यम् गंधा
दिकंदत्वा॥ पितामहादित्रयमाह सम्बन्धिनः कालकामनामानोवि
श्वेदेवाः एतन्नन्तलेपन॥ पुष्पाक्षततुलसीपात्रधूपदीपताम्बूलयज्ञो

॥६॥ पवीत वासासर्वो नमः॥ॐ निवे श्वदेवे॥ अपसव्यम् अमुक गोत्रास्मत्पितामह प्रपितामहवृद्धिप्रपितामह अमुकामुकामुक शर्मणः वसुरुद्रादित्य स्वरूपा एतेषां मन्नलेपन पुष्पाक्षत तुलसी पत्र धूपदीपनैवेद्य ताम्बूल पूगफलजलोपवीत वाससां तृतीयाशौचः स्वधानमः॥ सव्यम् आचम
रि४ नम् अर्चनविधेः सर्वपपूर्णमस्तु॥ पूर्वम्वैश्वदेविकपात्र घृतोदकेन समुद्दः निवेदनम्॥ इदं हस्तप्रक्षालनोदकम्पितृभ्यः स्वधेति तत्र शुद्धिः सव्यम्॥ पात्रे निधायमस्मनावेष्ट यित्वा यथाच आयुधो विष्णुः त्रैलोक्यं परिरक्षतु एवंम्मण्डलमैस्मेत त्सर्वम्भूतानि रक्षतु॥ ततो घृतान्नमन्नमादाय पृच्छति॥ विश्वेदेवार्थ्यान्नस्य अग्नौकरणं करिष्ये कुरुष्व॥ अपसव्यम् पितृभ्योन्नस्य अग्नौकरणङ्करिष्ये कुरुष्व॥ अग्नये कव्यवाहनाय स्वा-

हाइदमग्नये॥ सोमायपितृमते स्वाहा इदं सोमायपितृमते॥ इत्या
दितिद्वयजुहुयात्॥ अग्नौकरणशेषान्नंपिंडार्थंधारयेत्॥ सव्यम
न्नपरिवेषणम्॥ उत्तानपाणिवामहस्तोपरिदक्षिणंकरंकृत्वा
पात्रलंभनम् पृथिवीते पात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृते-
अमृतंजुहोमिस्वाहा॥ इदंविष्णुरित्यन्नेवगाह्य विष्णोहव्यंरक्ष-
इदमन्नं इदमाज्यं इदमेक्षवमग्नौषधयः समदंत्त सोमे
न सहराज्ञा यस्मै ब्राह्मणोति ब्राह्मणास्तथं रजन्यारयामस्मि इति पवा
न्विकीर्य॥ पितामहादि त्रयश्राद्धसंबंधिनः कालकामनाम्ना विश्वेदे
वा इदमन्नं घृताद्युपस्कर सहितं मुपनीतं मुपनेष्यमाणञ्च ब्राह्मण
भोजनतृप्तिपर्यन्तं वो नमः॥ अपसव्यम् दक्षिणोपरिवामकरंकृत्वा
व्यत्यस्तपाणिभ्यां पात्रलंभनं॥ पृथिवीते पात्रमितिजल्पागमतंजु

॥१७॥ मिस्वधा इदं विष्णुरित्यन्नेवगाह्य विष्णोकव्यं पं रक्षइदमन्नइदम
मापः इदमाज्यं इदमेहविं अपहतेति तिलान्विकीर्य्य ॥ अमुकगो
त्रा अस्मत्पितामह प्रपितामह वृद्धप्रपितामहाः अमुकामुकामुकश
र्म्माणः वसुरुद्रादित्यस्वरूपाः इदमन्नं घृताद्युपस्करसहितं अमृतरू
पं नेषामात्मनःश्चाद्धारामभोजनतृप्तपर्य्यन्तं गृध्यापितमज्ञावः स्वधा नमः
इदं वोऽपोशानममृतं यथासुखं जुषध्वमन्नमोदेवेभ्यः॥ इति प्रागवर्गी
श्रियासं दद्यात् ॥ श्राद्धं द्विजावलिं न कुर्य्याः मौनेनाश्नीयुः अश्नत्सु द्वि
जेस नकोरुद्रपन्त्यादि पितृसंहितां जपेत् ॥ अपसव्यमदक्षिणो विकराशनं
म्॥ आसंसकोत्पनीतानां त्यागिनां कुलयोषितां उच्छिष्टभागधेया
नां दर्भेषु विकराशनम्॥ अग्निदग्धाश्च ये जीवाजेप्यदग्धाकुले मम
मभूमौ दत्तेन तृप्यंतु तृप्ता यान्तु परां गतिं मैं कुशत्यागः हस्तौ पादौ प्र ॥७॥

इकोदिष्टेतिपूर्वेस्थानेनोक्ते येऽपार्वणेनांदीश्राद्धेचौत्तरस्थांपूर्वेम्बाद्धेऽवदक्षिणो ॥४॥

सव्येनाचम्य चुलुकदानम् ॥ अपसव्यम् पितृब्राह्मणानां चुलुकदानं सव्य-
म् ॥ इदं वः प्रत्यपोशानं त्युभयत्र मधुवाता ऋतायते मधुक्षरंति सिंधवः
माध्वीर्नः सन्त्वोषधीः मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः मधु
द्यौरस्तु नः पिता मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः माध्वीर्गावो
भवंतु नः ॥ इति मधुमतिं जपेत् ॥ मधु मधु मधु तृप्ताः स्थाः हु मा स्म ॥ शे
षमन्नं किं क्रियतां इष्टैः सह भुज्यताम् ॥ अपसव्यम् एवं पितामहादि
द्विनां प्रश्नः ॥ अथ प्रेते ॥ गन्धादिकं दत्वा अमुकगोत्र अमुकप्रेत एता
न्युशीरचंदन भृंगराजपत्रिका धूप दीप तांबूल पूंगफलादीनि मद्दत्ता
नि तवोपतिष्ठतां ॥ सव्येनाचम्य पात्रपरिवेषणम् अपसव्यम् तूष्णीं
पात्रालंभनम् ॥ इदं विष्णुरिति मंत्रेणावगाहनम् अपहता इति तिलवि-

विश्वेदेवाब्राह्म
णा मधु मधु
तृप्ता स्थः
अपसव्यम्
पितृब्राह्मणाम
धु मधु तृप्ता
स्थः ॥५॥

करणम् अमुकगोत्रामुकप्रेत इदमन्नं घृताद्युपस्करसहितमुपनी
तमुपनेष्यमाणाञ्च ब्राह्मणभोजनतृप्तिपर्यन्तं मत्तो' पतिष्ठताम्
स्वदितं सुस्वदितमिति तृप्तिप्रश्नः ॥ अथ पिण्डे ॥ सव्येनान्वारभ्य अप
सव्यम् ॥ पिंडदानार्थं वेदीं निर्माय तस्यामपहता इति रेखां निर्माय तस्या
मपहता इति रेखां निर्माय ॥ ये रूपाणीत्युल्मुकधारणम् ॥ अवनेजन
म् अमुकगोत्र अस्मत्पितामह अमुकशर्मन् रुद्ररूप पिण्डासनेऽवनेनिक्ष्व ॥ अमुक
गोत्र अस्मत्प्रपितामह अमुकशर्मन् आदित्यरूप पिण्डासनेऽव
नेनिक्ष्व ॥ सकृदाच्छिन्नानास्तीर्य यथानिरुप्तपिण्डान् दद्यात् ॥ अमुक
गोत्र अस्मत्पितामह अमुकशर्मन् वसुरूप सपिण्डीकरणश्राद्धे एतत्ते
न थ स्वधा नमः ॥ अमुकगोत्र अस्मत्पितामह अमुकशर्मन् रुद्ररूप

अस्मत्प्रपि
तामह प

अमुकगोत्र अ
स्मत्पितामह
अमुकशर्मन्
वसुरूप पिण्डा
सनेऽवने
निक्ष्व ॥

सपिंडीकरणश्राद्धे एतत्तेन ॐ स्वधा नमः ॥ अमुकगोत्र अस्मत् वृ
द्धप्रपितामह अमुकशर्मन् आदित्यस्वरूप सपिंडीकरणश्राद्धे एत
त्तेन ॐ स्वधा नमः ॥ इति लेपभागिभ्यो दत्वा ॥ आस्तृतकुशमूलैः क
रं मार्ज्जयेत् ॥ हस्तौ प्रक्षाल्य ॥ सव्येनाचाम्य ॥ अक्षतानादाय ॥ द
क्षिणामुखो ऽपसव्येन ॥ अत्र पितरो मादयध्वं यथाभागमावृषाय
ध्वं इति जपेत् ॥ ततः सव्येन उदङ्मुखः श्वासं नियम्य मुहूर्त्तं श्रमं ध्या
येत् ॥ पुनः अपसव्यम् ॥ अमीमदन्त पितरो यथाभागमावृषायिषत
इति मूलपिण्डमूले क्षिपेत् ॥ ततः अवनेजनम् ॥ अमुकगोत्र अस्मत्
पितामह अमुकशर्मन् वसुरूप पिण्डप्रत्यवनेनिक्ष्व ते ॥ अमुक
गोत्र अस्मत् प्रपितामह अमुकशर्मन् रुद्ररूप पिण्डप्रत्यवनेनिक्ष्व

॥७॥

ति ॥ अमुकगोत्र अस्मत् वृद्धप्रपितामह अमुकशर्मन् अदित्य
स्वरूप पिंड प्रत्यवनेनिक्ष्वेति ॥ पिंडोपरि जलं निषिंचेत् एवं ॥ नीवीं
विसृज्य ॥ नमो इति षडंजलिकरणम् नमो वः पितरो रसाय नमो वः पि
तरो शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पि
तरो घोराय नमो वः पितरो मन्यवे नमो वः पितरो नमो वो गृहान्नः पितरो
दत्त सतो वः पितरो देष्म एतद्वः पितरो वासः ॥ ततः सूत्रदानम् ॥ पितामहै
तत्ते वासः प्रपितामहै तत्ते वासः वृद्धप्रपितामहै तत्ते वासः ॥ ततः सूत्रदान
म् ॥ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे
पितॄन् ॥ अथ प्रेते ॥ वेदिकालेपनम् रेषाकरणम् अवनेजनम् ॥ अमु ज ३
कगोत्र अमुक प्रेत पिंडासने अवनेनिक्ष्व ॥ सूत्रोदकं छिन्नास्तरणम् ॥
पिण्डदानम् अमुकगोत्र अमुकप्रेत एष पिंडो मया दीयते तवोपतिष्ठ ॥८॥

ताम्॥ सव्यम् आचमनम्॥ अपसव्यम् प्रत्यवनेजनम्॥ अमुकगो
त्रअमुकप्रेतपिंडोपरि प्रत्यवनेजने मयादीयते तवोपतिष्ठताम्॥ सूत्र
स्थाने तूष्णीं ऊर्णासूत्रं दद्यात्॥ ऊर्जस्थाने तूष्णीं निमयनम् स्यात्॥
पिंडार्चा अमुकगोत्रअमुकप्रेत एतान्युशीचन्दनभृंगराजपत्रिका=
धूपदीपनैवेद्य ताम्बूलपूगफलानि मद्दत्तानि तवोपतिष्ठन्ताम्॥
अक्षोदकदानम् अमुकगोत्रस्य अमुकप्रेतस्य सपिंडीकरणश्राद्ध
सांगतासिद्ध्यर्थं रजतं चन्द्रदैवतं नौदातुमहमुत्सृजामि॥ सव्येनाच
मनम्॥ अथ पितृमंडले॥ आगत्यायसवेन॥ सुवर्णरजतशलाक
या कुशेन वा प्रेतपिंडं त्रिधा भित्त्वा वामहस्तेन पितामहस्य पिंडमादाय-
दक्षिणेन प्रेतपिंडस्य भागमादाय संमेलयति॥ तत्र मंत्रः॥ अमुकगो

॥१०॥ त्रस्य अमुकप्रेतस्य प्रेतत्वविमुक्तिपूर्वकपितृत्वप्राप्तये अमुकगोत्रेण
अस्मत्पितामहेन अमुकशर्मणा वसुरूपेण सह सापिण्ड्यं करवाणि ॐ
कुरुष्व ये समानाम्हयोः प्रजापत्याश्विसरस्वतीन्द्रा ऋषयः प्रथमायाः
पितरो देवता द्वितीयाया यजमान आशीरनुष्टुप्छन्दः सपिंडीकरणे विनि
योगः। ये समानाः समनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो
यज्ञो देवेषु कल्पताम् ये समाना समनसो जीवा जीवेषु मामकाः
तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः संगच्छध्वं सं ध्वं संवदध्वं सं वो मनो ॥४॥
केमनोसि जानताम्॥ देवभागं यथा पूर्वे संजानाना उपासते समा
नो समानो समानं मनः सहचित्तमेषां समानं मंत्रमभिमंत्रये
वः समानेन हविषा जुहोमि समानी व आकूतिः समाना हृदयानि ॥११॥
नि।

वः समानेन हविषा जुहोमि वस्तुवो नमो पथावः स्तु सहासनिः॥ मधु
या गो न्नमता यतं इति आकृत्र यम्यठेत इति केचित॥ त था मेलयति न पु=
यात रायः स्यात् एवमम त्य मांशं प्रपितामहेन तृतीयांशं वृद्धप्रपितामहेन
संजोऽन्यदेवताभ्य इति त्रिहस्ता पितृ मुख्यानां चित य न्नूं जदाने विधात्
पिंडार्थे॥ अमुक गोत्राः अस्मत्पितामह प्रपितामह वृद्ध प्रपितामह
अमुकामुका शर्म्माणः वसुरुद्रादित्य स्वरूपाः सपिंडन श्राद्धे पिंडार्च
नम स्वधिनां गंधं तुलसी पत्र पुष्पाक्षत तुलसी पत्र धूप दीप नैवेद्य ताम्बूल
पूंगी फल जलं योपवीतं वासः सांतृ तीयस्तृ यो शानः स्वधानमः॥ सव्यम्
इदमाचमनीयं॥ विश्वेभ्यो देवेभ्यो नमः॥ अपसव्यम्॥ इदमाचमनीयम्
पितृभ्यः स्वधानमः तनः सर्वेषां वाग्विसर्गे नेत्वेदिति॥ ततः सव्येन कर्म=
पात्रोदकेन सम्प्रोक्षितमस्त्विति नेदग्ग भूमिं निषिञ्चति॥ शिवा आपः
संत्विति॥ सकुशजलदानम्॥ अपसव्येम्॥ पितृब्राह्मणाः शिवा आपः

॥११॥

संस्त्विति ॥ शाकुशजलदानम् ॥ सौमनस्य स्त्विति पुस्पम् ॥ पितृभ्रातर रागाः
शिवा आपः संत्विति सकुशजलदानम् ॥ सौमनस्यमस्त्विति पुस्पम् ॥
अक्षतं चारिस्टं चास्त्विति जलदानम् ॥ सव्यम् अस्मत्कुले दीर्घमा-
युरस्तु शांतिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगस्त
स्वगायस्य तु बं यरेभ्याभ्व तुषादेभ्यः शांतिर्भी भवतु ॥ अपसव्यम् ॥ अ
क्षोदकदानम् ॥ अमुकगोत्रस्य अस्मत्पितामहस्य अमुकशर्म्मणाः वसु
रूपस्य सपिंडनश्राद्धे एतत्सर्वं यद्दत्तं तदक्षयं स्वाहा मस्तु अक्षीयतां
एवं प्रपितामह वृद्ध प्रपितामहयोः ॥ अघोराः पितरः संतु अघोराः मातामहाः
संतु ॥ सव्यम् ॥ गोत्रन्नो वर्द्धतां दातारो भिवर्द्धतां नाम अभिवर्द्धंतु वेदाः
संतिरेव च श्रद्धा च नो मे व्यगमत बहु देयं च नोस्तु अन्नं तु नो बहु भवेत्

ऽतिथींश्च लभेमहि लभध्वं याचितारश्च नः सन्तु याचिष्मा कंचन मा
याचेथाः एतास्त्वाशिषः संतु आयुस्मान् धनवान् पुत्रवान् लक्ष्मीकामो
भवंतु ॥ अथैनमभिपद्यावापिति ध्रुवोसि ध्रुवोयं यजमानेस्मिन्नायत
ने प्रजयाभूयादिति पशुभिरपीति वैवं ॥ ततः तिलकरणम् यं कामय
ते सोऽस्मै कामः समृध्यते दीर्घायुत्वाय बलाय वर्चसे सुप्रजास्त्वाय सहसा
अथो जीव शरदः शतम् ॥ ततोऽपसव्यम् ॥ स्वधावाचनीयान् कुशाना
दाय पंक्ति समीपे निखिडयेति ॥ सव्यं ॥ दक्षिणहस्तेनोदकमादाय विश्वे
देवा ब्राह्मणाः स्वधावाचयिष्ये इति पृच्छति वाच्यताम् इत्युक्ते ॥ अपस
व्यम् ॥ पितृब्राह्मणाः स्वधावाचयिष्ये वाच्यताम् ॥ अमुकगोत्रेभ्यः ✗ अमु युस्मत्पितृभ्य
कशर्मभ्यः वसुरूपेभ्यः स्वधोच्यतां अस्तु स्वधा ॥ अमुकगोत्रेभ्यः यु
ष्मत्पितामहेभ्योऽमुकशर्मभ्यः रुद्ररूपेभ्यः स्वधोच्यतां अस्तु स्व
धा ॥ अमुकगोत्रेभ्यः युष्मत्प्रपितामहेभ्योऽमुकशर्मभ्यः आदित्यरूपे

अयः स्वधोस्यतां अस्तु स्वधा इति ॥ कुशाग्रा णि चालयेत् ॥ सव्यं ॥ सांगता
पितामहादि त्रयस्मात् सवंधिनां कालकामनाम्नां विश्वेषां देवानां कृतैतत्स
पिन्डनश्राद्ध सांगतासिद्ध्यर्थं हिरण्य मग्नि दैवतं तन्मूल्यं वा यथानाम
गोत्राय ब्राह्मणाय दातुमहमुत्सृजे ॥ अपसव्यम् ॥ अमुक गोत्राणामस्मत्पि
तामह प्रपितामह वृद्धि प्रपितामहानां अमुकामुकामुक शर्मणां वसुरुद्रादित्य स्वरूपाणां कृ
तैतत्सपिण्डन श्राद्ध सांगतासिद्ध्यर्थं रजतं चन्द्र दैवतं तन्मूल्यं वा यथानाम गोत्राय ब्राह्म
णाय दातुमह मुत्सृजे त्रेधा विभज्य वो नमः । भोजन संकल्पः अद्य नाना नाम गोत्रेभ्यः ब्राह्म
णेभ्यः बान्धवेभ्यः स्वजन संबंधि शिष्ट विशिष्ट दीनानाथेभ्य आमान्नं पक्वान्नं च आसंध्य
मद्यएव पर्याप्तं वा यद्दीयमान मात्माहार पर्याहार वह्निष्कृतं तत्पितॄणां परमोपकाराय दातुम
हमुत्सृजे । सव्यम् अस्यविधेर्न्यूनातिरिक्तं यत्कृतं तत्सुकृतमस्तु यन्नकृतं तद्विप्र प्रसादा
द्ब्राह्मण वचनात्सर्वं परिपूर्णं परिपूर्णमस्तु । शमीपत्र प्रमाणेन पिंडं दद्यात्सपा शिरे । उद्धरेत्स
प्तगोत्राणि कुलमेकोत्तरं शतम् ॥ अपसव्यं ॥ पिंडाना मुद्धरणं मध्यपिंडं विसर्जयेत । अयनी

नमक - गुड़ा - तैल - कपास - सोना - घृत , सप्तधान्य - वस्त्र - पात्र
पददान - प्रत्यक्षगौदान

वी मुद्धह्स्न नमस्करोति पितृदेवत्यावै नीवीस्तस्मान्नीवी मुद्धह्स्न नमस्करोति यज्ञोवै नमो यज्ञिया
नानेव त्करोति षट् कृत्वो नमस्करोति षड्वा ऋतव ऋतवस्तस्मात्षट्कृत्वो नमस्करोतिव्रतान्त्रः
पितरो ददातीति गृहाणां थं ह पितर ईशत एषो एतस्याशीः कर्म्मणो ऽ याव जिघ्रति प्रसवधाय
पिण्डान् स यजमानो मनो सकृदाच्छिन्नान्नभ्यादधाति पुनरुल्मुक मपि सृजति तदु हो वाचक
होडः कौषीतकिः॥सव्यं॥ राजलक्ष्मीं वर्द्धयं त्विति राजलक्ष्मीं गृहीत्वा॥स्थानपूजा॥शंख
चक्राभ्यां नमः॥वसंताय कपिंजला नालभेते ग्रीष्माय कलविंकान् वर्षाभ्यस्तित्तिरीन् शरदे
वर्त्तिका हेमंताय ककराण् शिशिराय विककरान्॥इति पठित्वा यवान्क्षिपेत्॥अपसव्यं॥पात्र
पात्रांतरे कृत्त पिण्डानुत्थाप्य वामस्कंधे निधाय सव्यं आघ्राय अपसव्यं पुनस्तत्रैव वेद्यां
निदध्यात्॥मे पितृणां स्वर्गे स्वस्थान वासः॥पितृपूर्वं विसर्जनं॥पितृब्राह्मणाः स्वस्ति भवंतो ब्रु
वंतु ॐ स्वस्ति। वाजेवाजेवत वाजिनो नोधनेषु विप्राः अमृता ऋतज्ञाः अस्य मध्वः पिवत
मादयध्वं तृप्तायात पथिभिर्देवयानैः॥आभिरम्यताम्मिति प्रेत संवंधि विसर्जनं॥सव्यं विश्वेदेवाः
स्वस्ति भवंतो ब्रुवंतु ॐ स्वस्ति॥ देवागातु विदोगातु मित्वागातु मित मनसस्पत इमं देवा यज्ञ थं
स्वाहा वातेधाः॥अपसव्यं॥आमा वाजस्येति कर्मपात्रजलेन प्रदक्षिणी करणं॥आमा वाजस्य प्रस
वो जगम्या देवेद्यावा पृथिवी विश्वरूपे।आमागंतां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात्॥सव्यं

आचमनं पाणिना दीपं निर्वाप्य ॥ देवताभ्य इति त्रिर्जप्त्वा ॥ कर्म्मसाक्षिणे सूर्यायनम इति अंजलिं दत्वा ॥ आ
शिषो गृह्णीयात् ॥ इति सापिण्डन श्राद्ध पद्धतिः ॥ प्रमादात् कुर्वतां कर्म्म प्रच्यवेताध्वरेषु यत्। स्मरणा
देवता विष्णोः संपूर्णं स्यादिति स्मृतिः ॥ यः कश्चित्पितृ रूपेण तिष्ठते परमेश्वरः। सोऽयं श्राद्ध प्रदानेन
न लभतां तृप्ति मुत्तमां ॥ यस्य स्मृत्याच नामोक्त्या तपो यज्ञ क्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे त
मच्युतं ॥ यद् सांगं कृतं कर्म जानता वाप्य जानता। सांगं भवतु तत्सर्वं हरेर्नामानु कीर्तनात् ॥ इति सा
पिण्डन श्राद्ध विधिः ॥ संवत १८७३ वैसाखव॰ ६ ॥ एकोद्दिष्टेतु आग्नेय्यां पूर्वणे नैरृत्येस्मृतम्। पूर्व
स्यां माभ्युदयिके प्रेत श्राद्धे च दक्षिणे ॥ इति विकिरासनम् ॥ अवसाने दिनादूर्ध्वं यावदब्दत्रयं भवेत्। वह्निस्सा
दादिकं श्राद्धं भूरि भोजन वर्जितम् ॥ अथ शुद्ध श्राद्धम् ॥ नन्दाग्निवेदैक १४३१ दिनान्यतीत्य प्राप्ते दिने यस
मृतेर्हितस्तात्। श्राद्धं गृहेस्याप्तिपन शुद्धि हेतोस्त्रिपिण्डकं तत्र च कालमामौ ॥ दर्श श्राद्धं गया श्राद्धं तिलैः कृ
ष्णैश्च तर्पणम्। अब्द मेकं न कुर्वीत महागुरु निपातने ॥ नारी सेवा तथा मांसं परान्नं तिल तर्पणम्। वर्षं
मध्ये न कुर्वीत महागुरु निपातने ॥ कनीयसा कार्यं कर्म सपिण्डी करणं पुनः। तत्रायं सापि कर्तव्यं प्रेतश
ब्दं विलयेत्तु ॥ कृते सपिण्डीकरणे ततस्संवत्सरात्परम्। प्रेत देहं समुत्सृज्य भोगदेहं प्रपद्यते ॥ पितुरब्दम
शौचं स्यात्तदर्द्धं मातुरेव च। तदर्द्धं मृत भार्यायास्तदर्द्धं भ्रातृ पुत्रयोः। अन्येषां मासमेकं तु इति शातातपो ब्रवीत् ॥
इदं दीक्षित क्षेमराम ग्रयस्यम् यद्यपि स्मृति मंजूषायां निषिद्धम् तथाप्येतस्मिं सपिण्डीकरणे जाते प्रथमेऽब्दे

प्रत्यमायांत्रिपिण्डश्राद्धमाचरणीयम्॥

विशेष— यदि पुत्र माता की सपिंडी करे तो प्रथम माता का पिंड पिता के साथ ही संयोजन कर के पिता का पिंड पितामह आदि विषे युक्त करना।

॥इति सापिण्डनश्राद्धपद्धतिः॥